# Shri Dattatreya Uttaramala Mantrah

# શ્રીદત્તાત્રેય ઉત્તરમાલામન્ત્રઃ

## Document Information

Text title : Dattatreya Uttara Mala Mantra

File name : dattAtreyauttaramAlAmantraH.itx

Category : deities_misc, dattAtreya, mAlAmantra

Location : doc_deities_misc

Description/comments : Part 2 of the Malamantra, See part 1 pUrvamAlAmantraH

Latest update : October 17, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 17, 2023

*sanskritdocuments.org*

Shri Dattatreya Uttaramala Mantrah

# શ્રીદત્તાત્રેય ઉત્તરમાલામન્ત્રઃ

અસ્ય શ્રીદત્તાત્રેયમાલામહામન્ત્રસ્ય સદાશિવ ઋષિઃ, અનુષ્ટુપ્છન્દઃ,
શ્રીદત્તાત્રેયો દેવતા, ઓમિતિ બીજં, સ્વાહેતિ શક્તિઃ, દ્રામિતિ કીલકં,
શ્રીગુરુદત્તાત્રેયપ્રસાદસિદ્ધ્યર્થે જપે વિનિયોગઃ ॥

અથ કરન્યાસઃ ।
ૐ દ્રાં અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ દ્રીં તર્જનીભ્યાં નમઃ ।
ૐ દ્રૂં મધ્યમાભ્યાં નમઃ ।
ૐ દ્રૈં અનામિકાભ્યાં નમઃ ।
ૐ દ્રૌં કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ દ્રઃ કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥
અથ હૃદયાદિન્યાસઃ ।
ૐ દ્રાં હૃદયાય નમઃ ।
ૐ દ્રીં શિરસે સ્વાહા ।
ૐ દ્રૂં શિખાયૈ વષટ્ ।
ૐ દ્રૈં કવચાય હું ।
ૐ દ્રૌં નેત્રત્રયાય વૌષટ્ ।
ૐ દ્રઃ અસ્ત્રાય ફટ્ ।
ૐ ભૂર્ભુવઃસ્વરોમિતિ દિગ્બન્ધઃ ॥

ધ્યાનં -
કાશી કોલ્લા માહુરી સહ્યકેષુ
    સ્નાત્વા જપ્ત્વા પ્રાશ્ય શેતેન્વહં યઃ ।
દત્તાત્રેયસ્તક્ષણાત્સર્તૃગામી
    ત્યાગી ભોગી દિવ્યયોગી દયાલુઃ ॥

મૂલ મન્ત્રઃ -

ઓં, આં, હ્રીં, ક્રોં, ઐં, ક્લીં, સૌઃ, શ્રીં, ગ્લૌં, દ્રાં,

ૐ નમો ભગવતે દત્તાત્રેયાય

સ્મરણમાત્ર સન્તુષ્ટાય

મહાભય નિવારણાય

મહાજ્ઞાનપ્રદાય

સચ્ચિદાનન્દાત્મને

બાલોન્મત્ત પિશાચ વેષાય

મહાયોગિને

અવધૂતાય

અનસૂયાનન્દ વર્ધનાય

અત્રિપુત્રાય

સર્વકામ ફલપ્રદાય

ૐ ભવબન્ધવિમોચનાય

આં અસાધ્યસાધનાય

હ્રીં સર્વ વિભૂતિદાય

ક્રોં અસાધ્યાકર્ષણાય

ઐં વાક્યપ્રદાય

ક્લીં જગત્ વશીકરણાય

સૌઃ સર્વ મનક્ષોભણાય

શ્રીં મહાસમ્પત્ પ્રદાય

ગ્લૌં ભૂમણ્ડલાધિપત્ય પ્રદાય

દ્રાં ચિરઞ્જીવિને

વષટ્ વશીકુરુ વશીકુરુ

વૌષટ્ આકર્ષયાકર્ષય

હું વિદ્વેષય વિદ્વેષય

ફટ્ ઉચ્ચાટયોચ્ચાટય

ઠઃ ઠઃ સ્તમ્ભય સ્તમ્ભય

ખેં ખેં મારય મારય

નમઃ સમ્પન્નાય સમ્પન્નાય સ્વાહા

પોષય પોષય

પરમન્ત્ર પરયન્ત્ર પરતન્ત્રાણિ છિન્દિ છિન્દિ

ગ્રહાન્ નિવારય નિવારય
વ્યાધીન્ વિનાશય વિનાશય
દુઃખં હરય હરય
દારિદ્ર્યં વિદ્રાવય વિદ્રાવય
દેહં પોષય પોષય
ચિત્તં તોષય તોષય
સર્વમન્ત્રસ્વરૂપાય
સર્વયન્ત્રસ્વરૂપાય
સર્વતન્ત્રસ્વરૂપાય
સર્વપલ્લવસ્વરૂપાય
ૐ નમો મહા સિદ્ધાય સ્વાહા ॥

ઇતિ શ્રીદત્તાત્રેય ઉત્તરમાલામન્ત્રઃ સમ્પૂર્ણઃ ।

Proofread by Chandrasekhar Karumuri

*Shri Dattatreya Uttaramala Mantrah*
pdf was typeset on October 17, 2023

Please send corrections to *sanskrit@cheerful.com*